मः। तेनाप्यनारभ्यवादादतिदेशप्राप्तेः प्राथम्यं। अवश्यं च विकृतिषु स्रुवादिप्राप्तिरपेक्षितव्या। यावता चापतेन
स्रुवादयः प्राप्नुवंति तावता खादिरत्वादयोपीति नोपदेशविषयत्वं घटते। न चैषां क्रतुसंबंधो विद्यष्टः सोप्यन्यथानुपप

श्री०
१८

न्यायानुवादिद्वारेण कल्पयितव्यः। सर्वार्थत्ववादी च प्रकृतिसंबंधं तावदभ्युपगच्छति। तेन च परिहृत आनर्थक्ये विरु
ति संबंधो निष्प्रमाणकः प्रमाणवन्न रोचयति दर्शनक्रतुसंबंधं च। अयं पक्षस्तु क्रतुसंबंध एव प्रत्यक्षः सन्नारभ्यवादा अपि
सर्वार्था एवायं यथैव प्रजापतिस्सप्तदशो यज्ञो व्याप्त इत्येवमादयस्तस्मात्त्वादिरत्वादि प्रकृत्यर्थमिति सिद्धं।१। प्रक
रणविशेषात्तु विहितो विरोधिस्यात्॥ अपवादाधिकरणमेतत्। तत्र पूर्वाधिकरणेनैव सामधेनीसप्तदशपक्षस्य
नारभ्यवादस्य प्रकृत्यर्थत्वे प्रकरणाधीतेन पांचदशेन सह विकल्प इति विशेषाशंकां निवर्तयति। कथं पुनरा
करणिकेन विशेषविधिना सहातुल्यबलस्य विकल्पोभिधीयते अत आह। तत्र नाम विशेषेण सामान्यस्य निराक्रि
या प्रत्यक्षो यत्र संबंधो विशेषेण प्रतीयते। तुल्यप्रमाणको हि विशेषो बाधको भवति न दुर्बलतरप्रमाणकः। न च
क्रतुप्रयोगादन्यत्र सामिधेन्यो विद्यन्ते। तस्मात्क्रतुप्रयोगप्राप्तिस्तुल्या। ततश्च किं प्रकरणमप्यधिकं करिष्य
ति। द्वयोस्तुल्यबलयोः प्रमाणयोर्विरोधे सति बलवत्तरेण निर्णयः कर्तव्यो न च प्रकरणं वाक्याद्बलवत्तरमतो याव
त्प्रकरणव्यापारो भवति तावद्वाक्यद्वयेन तुल्यबलेन विकल्पो व्यवधार्यते तेन न्यूनबलं यद्यपि प्रकरणसहस्र
मपि च सहायी भवति तथापि न तदनुरोधः कर्तव्यः। तस्मात्प्रकृत्यर्थं सप्तदशपक्षमिति प्राप्ते ब्रूमः। तुल्यो यद्यपि संबंधः

18

राम
१८

सामीधेनीः प्रतीष्यते । तथापि क्रतुसंबंधविशेषाभावान्न विकल्प्यते । सामिधेनिस्वरूपप्रयुक्तत्वेनार्थिका संख्येत्यवश्यं यागापूर्व
साधनत्वकारितः संबंधोभ्युपगंतव्यः । न च यागापूर्वसाधनत्वे प्रकरणादृतेलब्धायितुं शक्यत इति नन्वेवमेव द्रूपामः तेन प्र
करणाद्ग्रहविशेषात्पांचदश्यमपूर्वसंबंधप्रमाणप्रत्यासत्तेर्वलीयः । विधिरपि हि पूर्वप्रयोजनवति पुरुषं नियुंक्ते
साप्तदश्यापेक्षया पांचदश्यं शीघ्रतरं प्रयोजनवदवधार्यत इति विधिकालविशेषाभावात्तुल्यबलत्वमपि च क्रतुमवि
गुणं कर्तुं पुरुषप्रवर्त्तितेन सामिधेनीः क्रत्वंगत्वेव साप्तदश्यस्य न किं विधिश्रुत्यादिप्रमाणमुपलभामहे यथा पांच
दश्यस्य प्रकरणं । तस्मादेतत्पांचदश्यं सामिधेनीनां दर्शपूर्णमासयोश्च वाक्यप्रमाणाभ्यामवधार्यते । साप्तदश्यं
केवलं सामिधेन्यर्थमवतिष्ठेदानीमानर्थक्यपरिहाराय खादिरत्वादिवत्क्रतुसंबंधप्रकल्प्यतयदित्वसौ प्रती
केन्नत्वसौ संख्यांतरादरुद्धसन्प्रतिद्धीति तत्र सामिधेनीनामुभयथाप्यवैगुण्यं भवति । कुतः पुनः पांचदश्येन
ततश्च कोप्यभोजिवदमुख्येष्वनुरोधः स्यात् ॥ किमंगपुनर्यदात्रांगगुणविरोधप्यवविस्पष्टः । तस्मात्कालवष्ट
भदर्प्यितेन पांचदश्येनोत्कालितं साप्तदश्यं क्लिष्टेन यावदभिदेशेन पांचदश्यं नैव विहन्ति । अप्राप्नोतीति तावदोप
देशिकेन साप्तदश्येन प्रथमतरावरुद्धत्वात्ताभ्यो निराकृतं केवलप्रकृतिविषयत्वेनैवावधार्यत इतिव्यवस्थाय ।

श्री०
१९

19

मुन्नायामुच्यते। नसाप्तदश्यंबलवद्विहितिधैपदेशिकं। अनारभ्यविधेस्तद्धिसामिधेन्यंगतांगतं। विकृतीनांतुनाम्ने
वप्रमाणंतत्परिग्रहे। अतिदेशेनहिप्राप्तिःपांचदश्यस्यतान्नपिपथाप्रकारणपाठंप्रकृतौबलवत्तरं। तथातिदेशवि
ज्ञातंअंगत्वंगंविकृतिष्वपि। नचसामिधेनीष्वनतिदिष्टासुतद्द्वारेणसाप्तदश्यविकृतिरनुप्रवेष्टुंशक्नोति। यदातुसा
मिधेन्योतिदेशेनप्राप्स्यंति तदापांचदश्यमपिलिङ्गापकारसंबंधेत। मिरस्यसहपूर्वतरमाक्रम्यप्रकृतावेवसा
प्तदश्यस्यबाधकंनविध्यतितस्मात्याध्यास्ववत्रपशुमित्रविंदाध्वरकल्पादिषुसाप्तदश्यंप्रकारणविहितंताश्चैवतद
तिदेशप्राप्तयापांचदश्यबाधेननिविशते। नानारभ्यविधिप्राप्तासर्वास्वेवमविध्यति। पश्चादिष्यतिरिक्तासुपां
चदश्येनबाध्यनान्न्। ध्यांगेनपांचदश्यनव्याप्तास्त्वात्यतिदेशतः। विहितंसामिधेन्यंगंसाप्तदश्यंनरुह्यते। एवंचद
शमेप्येतद्विविक्तंस्थापयिष्यते। तेननैतद्गृहीतव्यंसर्वत्रबलवत्तरं। सूत्रकारोपिविकृतौविराचीतंयदब्रवीत्प
प्रकृतौनैतदस्तीतितदेतावद्विवक्षया। सामिधेनीःप्रतिप्राप्तिस्तुल्यावाक्येनयद्यपि। विशेषःपांचदश्यस्यकृतौप्र
करणेनतुअतोयद्यपिदौर्बल्यंवाक्यात्प्रकरणस्यस्मत्। तथापिविषयान्यत्वात्कृतौतद्वितियाजकं। समानविष
यत्वेहिबाधपात्तदुर्बलंमतं। कृतौतत्प्रतिपक्षत्वान्नतद्वाक्येनबाध्यते। विशेषस्थायमेवास्थयदसाधारणंकृतौ॥

राम
१९

सामीधेनीषुतुल्येपिशेषत्वेवाक्यकारितात्।क्रतुंप्रत्यसमानत्वात्साप्तदश्यस्यवाचकं।नश्रुत्याद्युतावधुपदेशेननातिदेशेनतस्यानतत्।
एवंचप्रकृतावेतत्पांचदश्यंप्रतिष्ठितं।विकृतौचनयत्रास्तिसाप्तदश्यपुनःश्रुतिः॥२॥नैमित्तिकंतुप्रकृतौतद्विकारःसंयथाविशि
ष्टान्।यद्वैश्यादिनिमित्तेनसाप्तदश्यंविधीयते।तन्मुख्यात्प्रकृतावेवपांचदश्यस्यवाधकं।तद्धिप्रकरणेतुल्यंप्रकृतौविनि
योजकं।निमित्तेनतुसंबंधात्क्रियान्तद्बलवत्तरं।पांचदश्यमवाधित्वात्स्वात्मानंलभतेनतत्।स्वद्भुतेनसर्वेषुप्रयोगेषु
श्रुतंहितत्।साप्तदश्यंविधानंतुप्रयोगेवैश्यकर्तृके।अवाधेनापितस्यात्मापांचदश्येनलभ्यते।प्रयोगांतरेततस्यान्यु
विप्रराजन्यकर्तृकाः।साप्तदश्यमवाधित्वायेष्वात्मानंनलभ्यते।अतस्त्वशक्तिवैषम्येविकल्पोनमतस्तयोः।समुच्चयोपि
नैकार्थात्सामिधेनीषुयुज्यते।नैकत्रैकेनसंख्याताःसंख्यायंतेपरेणताः।नित्यस्यवाधशक्तिर्हिनार्थापत्त्यावकल्पते।पू
र्वापर्यंयथापूर्वंनिर्दिष्टस्यैववाधनं।काम्यनैमित्तिकाभ्यांहितथानित्यस्यवाधनं।असंजातविरोधंहिनित्यंसर्वंविधीयते।
नैमित्तिकंतुतद्व्याप्तविषयत्वाद्विरुध्यते।तेनैकविषयत्वेनविरोधस्यैकवाधनं।विरोधायोगपद्यात्तुनविकल्पप्रसंजनं।
किंचप्रयोगसामान्येनित्यंसर्वंविधीयते।नैमित्तिकंविशेषेतुतस्मात्तद्बलवत्तरं।नित्यमंगंबहूरस्थप्रधानादूर्ध्वचोदितं।कि
यततत्प्रमाणंचपरंप्रकरणेमतं।काम्यनैमित्तिकानांतुवाक्योपात्तंप्रयोजनं।अतःशीघ्रप्रयुक्तत्वान्नित्यात्तेबलवत्तराः।आश्व

श्री०
२०

20

पुरुषार्थत्वाद्धि प्रकृष्टफलात्तथा वलवद्धीप्रकारित्वात्काम्यं नैमित्तिकादपि। श्रुतैव पुरुषार्थे हि शीघ्रं कर्त्ता प्रवर्त्तते। नैमित्तिके
हि दूरस्थे विरणास्सोऽप्रवर्त्तते। नैमित्तिके श्रुतं यच्च काम्यमेव विचारितं। तन्नित्यं प्रति तुल्यत्वादविरोधात्परस्परं। पूर्वाधिकरणे नै
व पूर्वपक्षे निरूपितः। नित्यस्याप्ति विशेषो हि काम्या प्रकरणे यतः। चमसस्यादिरत्वं च ज्ञात्वर्थे हि विचीयते। बैल्वगो दोहनादि
नां काम्यत्वात्पुरुषार्थता। वाच्यते फललाभेन नित्यं काम्येन तत्र वेत। पश्यतोऽमक्कदुबुद्धि विनिपातस्ततो नवेन्नु। क्रत्वर्थो गो
महाणोहि न श्पत्तस्य कतोः फले। गुणाच्च न फलं सिद्ध्येद्धि गुणं क्रतुमाश्रितात्। आश्रयस्तादृशाही ष्टेयादृशः प्रकृतः क्रतुः।
खादिरत्वादि नित्यत्वे व्याप्तस्यासौ प्रतीयते। ततस्यानवरुद्धत्वात्काम्यस्य विद्धाति गीतिः। अप्तिस्वार्थो विशेषो हि क्रतोः
प्रकरणं प्रति तेन गृह्णाति हि स्वार्थेन तु काम्यं कथं वने। इति कर्त्तव्यतार्थित्वात्संयुक्तं हि न शक्यते तेन प्रकरणं प्राप्तं संयु
क्तात्फलवत्तरं। न हि प्रकरणं तस्य विनियोगस्तु संमतं। क्रत्वर्थस्याश्रयोऽप्यस्य स्वार्थे रुद्धो न लभ्यते। पूर्वाधिकरणन्यायस्त
स्मान्नैमित्तिकेष्वपीति प्राप्त उच्यते। नैमित्तिकं तु प्रकृतौ वर्त्तते नित्यवाचया। हेतवोऽत्र यः पूर्वव्याख्याता एव संमताः। असंयोग
स्वाचेन संयोगोऽस्य विशिष्यते। पुनः क्रतौ विशिष्टस्य प्रयोगस्य परिग्रहात्। साक्षाच्च पुरुषार्थत्वादनन्याश्रयगामिनः। एवं सिद्धवली
यस्त्वं निवेशः प्रकृते। स्थितः। न च तुल्यार्थयोर्वाचः क्रत्वर्थपुरुषार्थयोः। न युक्तो न विरोधोऽपि निमित्र गोचरयोस्तयोः। अतश्च पु

राम
२०

पुषार्थत्वात्तस्य च प्रणयनक्रिया। प्राप्तित्वमसे नैव क्रत्वपूर्वस्य साधनात्। न साधयति पश्वादी क्रत्वर्थश्चमसो यथा। गोदोहनं तथाप्य
र्थं न क्रत्वर्थस्य साधनं। न चोभयार्थता तस्या वाक्यभेदप्रसंजनात्। विधिर्नास्त्येकवाक्यत्वे फलप्रणयनं प्रति। अन्या हि क्वचनन्य क्रिःय
लोद्देशेन तद्विधौ। अन्याप्रणयणोद्देशे तस्मान्नद्वयसंभवः। आसन्नासंनभवे चेष्टा विप्रकृष्टेन संगतिः। युगपत्तेन न तस्यातां सं
भवासंभवावुभौ। अतश्चाभिपदार्थेपान्नान्यस्य प्रणयने विधिः। अविधानादर्थेषत्वान्नशेषात्तु रवाचनं। अवाचात्वचमसो वश्यं
कर्त्तव्यश्च क्रतुं प्रति। न चान्यस्यावकाशोऽस्ति क्रत्वर्थेन्येन साधिते। तेन प्रणयनाभ्यासः कार्यः काम्यगुणं प्रति। यथैवं द्रवाय्
देवत्येयहे भित्राद्यसंभवात्। भिन्नं भित्रादि देवन्यं ग्रहाभ्यासान्तरं विधेः। एवं प्रणयनाभ्यासः पुरुषार्थवशाद्भवेत्। द्वयोरेव
भवेद्गुणपंक्तताभ्यस्यात्फलस्य च। तद्धि स्वसाधनत्यागादन्यसाधनसाधिते। कर्म्मभिः साध्यते स्वार्थश्चासनाभिरलंकृतः
उच्यते यो गुणः काम्यः क्रत्वर्थेन स गृह्यते। क्रत्वर्थकार्म्मकृत्तस्मिन्नेव स्वार्थसिद्धये। निर्व्यापारो गुणः कामं न साधयति कश्चन।
करणत्वं न तस्यास्ति निःक्रियस्य फलं प्रति। तेनावश्यं क्रियाकाविक्रायायाः स प्रमाणिका। मा च प्रकरणेनास्मेदन्ना प्रणय
नात्मिका। तस्यां च चमसः पूर्वप्राप्तोन्या विधीयते गुणः। तदवाधादर्थकस्य च विधिर्गोदोहनादिनः। गोदोहनाद्यवाधित्वाय यथासौ विहित
स्तथा। तदवाधनतैवेह तस्यैकस्य विधिर्विधिः। श्रुतं काम्येन गृह्यमाना च क्रियाप्रणयनात्मिका। विप्रकृष्टफलं शक्ता स्वगुणेनोपजीवितुं।

क्रियया वा गृहीतस्य गुणस्याकरणे गुणः । करणे तस्य दोषः स्यात्त्रिष्वीध्मस्यैव संगतो । भिन्नप्रयोजनो पि हि काम्यो गुणो वांतरकार्यैक
त्वाद्विरोधिगुणांतरज्ञानमिथ्यात्वाच्च वारणसमर्थः । तथा हि । ग्रासंगि किं न्व्रातः सिद्धिकाम्यो हि कुरुते गुणः । गृह्णंति न च विध्यर्थाः क्रतवः
स्वगुणं तदा । सर्वस्यैव हि कार्यार्थं स्वगुणग्रहणादरः । अन्यार्थगुणसिद्ध्यर्थं तु कार्यस्य स्वगुणेन किं । हविःसंयवनार्थानामपां
प्रणयने हि यत्न । तद्गृहीत्वा गुणकाम्यः प्रयुङ्क्ते न क्रियांतरं । ततश्चास्य प्रयोगस्यानेनांगं चमसो मतः । तद्ग्रहणं तु तादर्थ्येनैव
गुणे न क्रियते सः तेन प्रणयनं । प्रयासः कर्त्तव्यो हि न विद्यते । निःफलत्वादतो वाच्यः प्रयोगात्कर्म्मणः सकृत् । तथा प्रणयनम
पि निर्वर्त्यमानमेव गोदोहनस्याश्रयत्वं प्रतिपद्यते नान्यथेति पशुकामप्रयोगेन्यार्थेन सता गोदोहनेन निर्वर्तितत्वान्न चम
समनुपसंग्रहीष्यति । कार्यार्थं हि सर्वत्र साधनग्रहणं । न स्वरूपमात्रसंभावनार्थं । तत्र यथैव प्रसंगलक्षणेनान्यार्थैरिवांगैरु
पक्रियमाणः पशुः पुरोडाशादयो न स्वांगान्युपसंगृह्णंति न वत्सादया । किंचिद्धि गुणं भवति । ततश्चात्र चमसस्यान्यानतिकृष्ट
व्यं उत्पत्तिप्राप्तमपि विद्यतु पसंगृहीतं तेनैवांगं भवति । न चानंगम गृह्णतो दोषस्तुतरां वा तद्ग्रहणे वैगुण्यप्रसंगः न्यवीस
३ दोषस्य प्रधानस्य प्रणयनस्य गुणानुरोधेनावृत्तिरित्विकांतं न चमसस्य प्रणयनस्यांगं । न चात्र चमसेन कृते गोदोहने न पुनः
करणमाशंक्यते । किं तर्हि गोदोहनेन कृते चमसस्य संपादनार्थापि पृथक्करणाशंका । कथं पुनर्गोदोहनप्राप्तिर्बलीयसी न चमसप्राप्तिरि

तितदुच्यते। विशेषविहितं ह्येतत्प्राप्तेवानवकाशकं। पुरुषार्थसप्तमीपक्षे च चमसं तेन बाध्यते। प्रयोगमात्रे हि चमसो गोदोहनं
विशेषपूर्वप्राप्तस्यासौ तद्बाधेन लब्धात्मा नैवं गोदोहनं। सावकाशश्चासौ नेतरत्। दूरे चासौ पुरुषार्थत्वगोदोहनं तु
सन्निकृष्टं पुरुषार्थत्वं सर्वशास्त्रप्रवृत्तिः। यच्छ्रुतादर्थात् तादर्थ्यं कृतो विशेषो नासौ तेनेत्रमिति वक्तव्यं तत्र यथ्यविरू
त्वादिति। भेदो ह्येष विशेषक्रान्त्यर्थैकवाक्यत्वयोर्विशेषादिविहितेन बाधितव्यो नान्यार्थेनेति। तेनात्र योऽसन्निधिर्विवक्षा
न्यपरस्य रशक्तिलोपान्नियमः प्रणयनस्याप्यन्यत्र प्रयोगे सिद्धात्मलाभस्य स्वसाधनोपसंहारशक्तिलोपो गोदोहनस्या
पिप्रणयनान्तरकल्पनाशक्तिविघातः पशुकामप्रयोगव्यतिरिक्ते च चमसस्य शास्त्रीयत्वं तस्मान्न द्विकारो गोदोहनं।
यथा तु विकृतौ चमस एव समविषयीति तथा उपरिष्टाद् वक्ष्यति निवृत्तिर्वा कर्मभेदादिति तेन प्रकृतावेवैतद् द्विकारकमिति॥ ३॥
इत्यर्थमध्याचर्थं प्रकरणान्तु। अनारभ्यवादप्रस्तावेनाद्यपि यच्छ्रयमं तावदनारभ्यवादत्वमेव प्रतिपाद्यते। प्र
करणेन तावत्स्ववमानमर्थत्वं प्राप्नोति सृत्पादुकस्तु ह्यर्थत्वमतः प्रकरणविशेषाधातद्युक्तस्य संस्कारादृष्टपक्षवादि
दृष्टार्थासिस्संस्कारत्वाच्छ्रुतिवाक्यप्रकरणैर्विरुद्धैरिष्टार्थाभ्यधित्वमेव चाप्यते। शुद्धार्थत्वं च निःप्रयोजनत्वान्न द्व
रणेनावश्याधानग्रहणसामर्थ्यात् तस्मादिष्टार्थमध्याचानं। अपि च प्रकरणास्वपदमानेष्टिविषयं दष्टं। नवाता सांतदर्थत्वान्त्२॥

श्री
२२

22

पयाराद्उपकारकभावानंभवेत्ततःप्रकरणादिष्वर्थमितिगम्यतेवाक्यसंयोगात्तुद्वितीयानिर्दिष्टाग्निसंस्कारार्थमत
देवंवसतियद्यग्नयःपवमानेष्ट्यर्थाभवेयुस्ततस्तद्वारेणज्ञानमर्पितदर्थंभवेत्।नास्तुनिष्फलत्वादग्न्यर्थाइष्टयुक्तामतश्च
गुणानांचपरार्थत्वादित्यनेनैवपरस्परानंगत्वंनहिद्वितीयाश्रुतिःप्रकरणेनबाध्यते।लिंगदर्शनाच्च।तेनैनंपुनर्विक
रोतीतिवाग्निसंस्कारार्थतांदर्शयति।।४।।तत्प्रकृत्यर्थंयथान्येनारम्भवादाः।।सिद्धनारम्भवादत्वेखादिरत्वादिव
देवप्रकृत्यर्थत्वमग्निद्वारेणप्रकृत्यनुप्रवेशात्।।सर्वार्थमाधानस्यस्वकालत्वात्।।पूर्ज्ञातावदियंबुद्धिर्भवतिय
दिप्रकृतिकालआधानंक्रियतेततःप्रकृत्यर्थंभवेत्स्वकालेतुवसंतादौक्रियमाणमग्न्याधानविशेषत्वात्सर्वार्थं
विज्ञायते।तथाचाग्न्याधानस्याचाराणमध्येकारश्चवक्ष्यतिसंध्याकर्मकालेनिष्यतेप्रयोगःसर्वार्थःस्यादितिप्र
कृत्यर्थत्वेचदर्शपूर्णमासज्योतिष्टोमार्थमेतद्भवेत्।तत्रचप्रधानवशवर्तित्वाद्वसंतेपौर्णमास्यममावास्ययोर्वाक्रि
येततथाचवसतिवसंतेपौर्णमास्याममावास्यायांवादधीतेत्यतोनिवचनान्यनर्थकानिभवेयुस्तस्मात्सर्वार्थत्वमि
ति।नत्वेतद्युक्तं।नह्याधानस्यप्रकृत्याविकृत्यावासंबंधे किंचित्प्रमाणमस्ति प्रकरणेसतियत्पवमानेष्ट्यर्थंन
जातंतद्विनैवक्रतुत्पादिष्वकेनान्यकर्मार्थंभवीष्यतीतिकृतएतज्ज्ञानन्त्वेवंसतिपूर्वोक्तिकरणेनैवगतमेतत्।सत्य

राम
२२

गादेस्त्वपदिश्यमाने ह्यिवद्दर्शपूर्णमासादीन्यपि निष्फलानि भवेयुः तेषां तु फलवत्वाङ्गुणानां च परार्थत्वादित्येवं प्रा
प्तानास्तीति शक्यमभिहारेण कर्माङ्गत्वं कल्पयितुं निष्फलस्याधानस्यावश्यकल्पनीयेप्रयोजने भिहारेणस्वाङ्गि
त्वादिवत्कर्मार्थत्वमापद्यते । श्यकुर्वंतीति हि प्रयोगमध्यस्थादवक्तयं कर्मणाम्युपस्थापयितुं । यथैव प्रोक्षणादीनांद्री
त्वादिस्वरूपमतित्तस्यव्वादीरत्वादीनां चस्रुवादिस्वरूपं कर्मापूर्वप्रयुक्तत्वं कल्पितं तथाधानस्यापि स्त्र भिस्वरू
पातिक्रमेण कल्पयितव्यं यदि स्वाश्रिस्वरूपमात्र प्रयुक्तमेवाधानं भवेत्तत्कर्माण्येनाहितेनाप्यग्निना सिध्येयुर्न
च प्रयुक्तस्य सगुणोऽकार्यनाभिभिः तेनावश्यं भाविनिकर्मसंबंधे प्रकृतपर्थत्वमग्निद्वारेणात्वाङ्गुपत्यसंयन्तु स्वकाल
त्वं तद्वुपदेशादतिदेशप्राप्तस्यपूर्ववेदनवत्प्रयोगसाधारणपार्थमितिनसर्वार्थत्वं गमयतीति यदपि वसंतादियहणा
तदप्यप्राप्तविषयमर्थवद्भविष्यति । न हि दर्शपूर्णमासार्थस्याधानस्य वसंतकालत्वं प्राप्तं प्रत्यक्षमासंप्रयोगप्र
सक्तेः नाप्यग्निहोत्रे तस्यद्विहोमार्थस्यपौर्णमास्यमावास्याकालप्राप्तिर्न्नवप्रयोगसाधारणैस्वकालत्ववनाद्दृते
सिध्यतीति नानर्थकत्वमत एवं व्याख्ये । न कार्यविल्कर्माणांगसाधनं निंतहि द्वितीयासंयोगादग्न्यर्थमेव तेन तस्य
स्यस्वकालत्वादित्यनेन नसर्वार्थाजिवीषंतीति तिद्वारेण सर्वार्थत्वमित्युच्यते स्वकालत्वादित्यपि स्वातंत्र्यादाम्नानादित्यर्थः

श्री॰
२३

यच्चितरानारभ्यवादवदितितत्त्रानिश्चीयते। सिद्धेन्त्वेतत्तस्मेषांकिमर्थत्वंविचारितं। नतुकर्मणामावेहिप्रमाणं किंचिदस्ति
तोरपादिरत्वादीनिध्रुवादिभिसंयुक्तात्पिपितत्स्वरूपमयुक्तात्वेनप्रतिपद्येते ध्रुवादिशाष्टानामाहृतिवचनात्वाहिन।
पिरवादिरत्वादिभिरुपपन्नेभ्यारखादिरोपिहितदाकास्तु कम्प्रुवशाष्टत्वाद्यामवत्येव। तत्रप्राक्कर्मार्थत्वान्नजातिनि
यमस्यप्रयोजनमस्तीतियुक्तंस्वरूपातिलंघनेऽद्धत्वाहवनीयादिशाष्टानांसंस्कारमिभिन्नत्वान्नाधानाद्धिनापद्
तिस्तयलभ्यतइतिशाष्ट्रप्रवृत्तिनिमित्तत्वेनैवार्थवत्ताविज्ञायते। यत्तुतेनविनापिकर्माण्यपविगुणानस्वभवयु
तिरग्निवत्तदभावेततत्वात्तवैगुण्यंभवतिविंतत्याहवनीयाद्यसंभवहेतंयदित्याधानमनुकुर्वीतस्वावुन्मानुभवन्
स्यान्नतोनैववैगुण्यंभवत्तदभावेन्वाहवनीयादयोपिनभवंतितिवेकातेनकर्माणामंगमतस्तेनतावैगुण्येपसक्तिः।
यदिवाग्निमात्रेणकर्माणिसंवध्येरन्नतत्स्वरूपस्यांतरेणपिन्नाधानंनिष्पतेरतत्प्रयुक्तताभवेत्। यदाहवनीयेजुह
तीत्येवमादिवोदनार्थःपुनर्नैकदाचिदाधानमंतरेणसंभाव्यते। तेनकर्माणिकुर्वतातदप्यवश्यंकार्त्तव्यं। तस्माद
ग्न्यर्थपत्नुद्रव्यस्याकर्मकालनिष्पतेरिति। साक्तत्वाविंतेनितत्रैवववक्ष्यते। एतेनपवमानेष्टीनामाप्यग्न्यर्थत्वंव्याख्यातं।
आशंकाशेषस्योत्तरेणाविकरणेनव्यावर्तते॥५॥वासामग्निप्रकृतितत्प्रयाजवत्स्यान्। तस्यांतुस्याप्रयाजवदित्यतद

राम
२३

२५

धिकरणन्यायेनपवमानहविःसंस्कृताग्निसाध्यत्वंतासामग्नीनामस्तीतिविचारः।तत्रेष्टिषुदर्शपूर्णमासयोःप्रकृतित्वमित्येवंपवमानेष्टीनां
दर्शपूर्णमासप्रकृतित्वंसिद्धंयथैवप्रयाजादीन्यतिदिश्यन्तेतथैवपवमानेष्टिसंस्कृताग्नित्वमपि।ननुवाहवनीयादयःसर्वकर्म
णांप्रत्यक्षवद्भूताएवंचाग्नित्वंप्रतिपद्यन्तइतिनवक्तव्यंप्रकृतितइतिनैषदोषः।यत्रैवप्रत्यक्षश्रुत्याजुहोतिस्तत्रप्रकृतिसमका
लमाहवनीयसंबन्धोऽवकल्पतेयत्रपुनर्द्रव्यदेवतासंबन्धमात्रंकल्प्यतेचतुरवत्तंजुहोतीतिप्रकृतितोहोमःप्राप्नोतितत्र
द्वारस्यप्राकृतत्वादाहवनीयेनापिप्रकृतितएवभवितव्यमतश्चाग्नीनांप्रकृतितइति।ननुपवमानसंस्कारार्थंक्रियन्तेतासमर्पयन्ताः
प्राप्नुवन्तीतितासामर्थन्याय्यत्वमवस्थाप्राप्नोतीतिनैषदोषः।सर्वानवस्थानांसामर्थ्येनव्यवस्थानात्।यावत्त्वोऽग्निकालेपौर्ण
मास्यमावास्यादिकंनातिक्रामन्तीतितावत्पक्षेकरिष्यन्ते।नचानेतासांतदर्थत्वात्।यन्नामप्रयाजादिप्रकृतेरंगंसर्वंतत्तदतिदि
श्यते।ननुपवमानेष्टयःकर्मांगमित्याधानन्यायेनसाधितं।अतोनरूपंवाक्यंपरतत्वादित्याहवनीयादिस्वरूपमतिदिश्यते
नेष्टयः।आरंभणीयात्वंगभितिकृत्वाधिकरणान्तरमारभ्यते।तदीयस्यकन्यायोऽपिनविष्यति।सत्यपिचांगत्वेयावन्नविधी
यन्तेतावन्नैवेष्टयःप्रकृतोदृश्यन्ते।यावच्चविकेनकथंभावेसङ्गावनान्नपूर्ण्यतेतावद्विविर्त्तेप्रवर्त्तन्तेतेनपवमानेष्टिरहितायांप्रकृतौ
ताभिरितिकर्त्तव्यताग्रहणमाणान्तद्व्यतिरिक्तावाक्वचिविहितैवकल्पनाग्रहीतुंशक्यते।अन्यथाह्येकस्मिन्वाक्येविहितवदंगानामविहित

धविधानमितिस्वरूपविप्रतिषेधःस्यात्तस्मादाहवनीयःप्राकृतवमाने शिष्यस्त्राहगवता सांप्राप्त[illegible]तिनिष्पन्नस्याहवनीयस्यप्रयोजन
मपेक्षमाणस्योपदेशेनातिदेशेन वागत्वंशक्यंप्रकल्पयितुं। एतावस्तु निष्पत्त्यर्थाएव तेनतत्कृतमुपकारमपेक्षन्ते न्यायतोपि सिद्धमुप
देष्टुमतिदेष्टुंवाशक्यते। तस्मादाधानमात्रसंस्कृतेनाग्निनासंबद्ध्याइतिसिद्धं॥ धातुरूपःसर्वेषांपशूनांविधिःप्रकरणविशे
षान्नुहवनीयस्थानस्थप्रकरणेनसहपूर्वेणअविरोधाविरोधौ चिंत्येते। उपांशुयाजमंत्रामंसंस्कृत्य यथाशयःप्रत्याताग्नी
षोमीयःसवनीयोऽनुबंध्यश्चेति तिसर्वेकथंनावेद्यर्थानपेक्षते। तथायवसक्थ्यहनित्राग्नीषोमीयप्रणयनोत्तरकालमुप
करणादयःपशुधर्माःपठ्यंतेतेषुवकृदुसंदेहः। विध्नयाणामपिपशूनामर्थेनाम्नायंते। अथसवनीयार्थेनैवअथसवनी
याग्नीषोमीयार्थेन। अथकेवलाग्नीषोमीयार्थेनैवेति। किंप्राप्तंतत्रसवनाद्यपूर्वंस्यात्त्येवमादिसूत्रसंगत्यर्थमसूत्रं[illegible]वसू
र्वपक्षंकरोतिसर्वार्थाइति। यदित्वयमेवपक्षःसूत्रेणपरिगृह्येततत उत्तरसूत्राणिसंगतान्येवभवेयुः। यदापूर्वपक्षसूत्रेणैवस
र्वार्थत्वंप्रतिज्ञायतेतदाकिमनेनस्थानाद्यपूर्वश्चेति प्रकरणविभागादेवहिपूर्वस्यापिसिद्धिःस्य स्त्वेकेषामित्यपि
प्रकरणमात्रकथनेनाप्रतिज्ञातकेवलसवनीयार्थताव्यावर्त्यमानाकथंसंबध्यते। एवंतदनुसारित्वादुत्तरसूत्राणामप्य
संगतिः। अथवासेत्रएवपूर्वपक्षेकेवलसवनीयार्थत्वमसूत्रितं स्थितीयंपक्षंसूत्वात्याश्च स्त्वेकेषामित्यादिसंबंधनियं तत्तन्नुभाष्य

कारणानाश्रितेसर्वाद्यः पक्षःसुखमसूत्रः क्रियतेसौत्रपक्षांतराले तुतत्संगत्यर्थमसूत्रपक्षाश्रयणं सूत्रकारस्यसूत्र्यहृदयतामापा
दयतितस्मादाद्यएवमुक्तःकः पक्षः। तस्योपपत्तिः पशुधर्म्माहिज्योतिष्टोमप्रकरणेकेनचिदपिपशुविशेषेणासंयुक्ताःश्रूयन्ते। कथं।
एतेहृदयस्यानुष्ठानं वाक्यादित्युपपद्यतेतथाप्युत्पत्तिदेशे स्थप्रक्रियाक्रमसन्निधौदीक्षास्तुहि सामक्रयसमीपेत्रग्नी
षोमीयः समाम्नायते। तस्यचपश्वपिवचनसामर्थ्यान्यस्तुधर्मसमीपेत्रनुष्ठानं भविष्यतितथापिप्रकरणेननैंद्राग्नः
सर्वप्रकरणानामुत्पत्तिदेशानतिरेकान्नास्वनीयानामपिस्तुत्याकालमुत्पत्तिवाक्यमौपवसथ्येतुगुणार्थंवश्रुतिः न
चतयाप्रकरणंभवति। अनुवंध्यातुउदवस्येवसोमान्तेक्रियमाणत्वात्। तस्मादवांतरप्रकरणवाक्यसंयोगाभ्यामप्रति
बद्धेनज्योतिष्टोमप्रकरणेनाग्नीषोमीयस्यस्थानंविप्रकृष्टार्थंवाधित्वाज्योतिष्टोमार्थास्त्रावदंतइत्येतत्कल्प्यते। तस्यच
सोमद्रव्यकत्वान्नपशुधर्म्मैः किंचित्प्रयोजनमित्यानर्थक्यात्तदंगेष्वितिपवमंगोष्ठेवावतरंतोंगत्वाविशेषात्त्रीण्यप्यवरंति
सत्यपितदंगत्वेयोगपत्वाभावान्नदीक्षणीयादिष्ववतरणं। सत्यपिचयोगपत्वेसामान्यसंबंधाभावान्नातदंगपशूनां। त
स्मात्त्रयाणांसमानंविधानमितिप्राप्तेभिधीयते। स्यादेतदेवंयदिज्योतिष्टोमद्वारेणप्रकरणाविशेषःस्यादस्तितुविशेषः सव
नीयानामौपवसथ्येहन्युत्पत्तेराग्नेयमजमग्निष्टोमआलभेतऐंद्राग्नमुक्थ्ये द्वितीयमित्यादिनाहिपशुधर्मसमीपेसवनीयाः

त्यादिनाः तस्मात्केवलसवनीयार्था एवेति। स्थानाच्च पूर्वस्य। कथं पुनरिदं श्रुतिलिंगाधिकरणविपरीतमभिधीयते। न हि तत्रै
वमिष्टं प्रकरणाद्धि देवनादयो राजसूयार्थाः स्थानाच्चाभिषेचनीयार्था इति। तथा श्रुत्यैंद्री गार्हपत्यार्था लिंगेनेंद्रार्थेति युक्तं तत्र प्र
करणाम्नानेनबलीयसा प्रमाणेन निराकांक्षीकृते जघन्यप्रमाणानुत्थानात्समुच्चयानाश्रयणं। न हि तत्र पुनरन्वाप
नयाद्विनार्थाषष्ठ्यं न किंचित्सिध्यति। नापि शेषिणा भिंद्राम्पादीनामुपायांतरेणापि स्मृतिसिद्धेः। इह पुनः सत्यपि सवनीय
संबंधाद्धर्माणां नैष्काद्येऽग्नीषोमीयस्य पशुधर्म्मैर्विना सिध्यन् वात्याप्रंतरमवश्यं कल्पनीयं तेन ययोरविप्रतिपत्तेन्न
येत स्यात्तदा दर्शपूर्णमासप्रकृतित्वं भवेन्न यो हि प्रकृतिभूतः पशूनां स दर्शपूर्णमासविकारो भवतीति रतु प्राणिद्रव्यकाल
सामान्यात्तद्विकारास्तत्र किं सवनीयार्थाः स्युः तेः साद्गुण्यद्वारप्रभवनातिदेशेनाग्नीषोमीयप्रकृतावुपदेशं गच्छेन केन विदि
त्युपदेशांतर्गतत्वात्क्रमेण विनियोगाद्युक्ताः। षड्विधोपदेशप्रसमये ह्यतिदेशः कल्प्यते। तस्माद्यद्यप्यन्यत्रोपदेशातिदेशाभ्यां
प्रकृतिविकृत्यर्थत्वं यागगतस्य भापारस्य तथैवेहस्थानप्रकरणाभ्यामनयार्थत्वमस्य संख्यायामनुसर्वोपदेशानावादीतिदर्शे
नैव प्राप्तिर्न विध्यति। तस्मादुपालंभः सूत्रस्य।। अस्त्येकेषां तत्र प्राक्श्रुतिगुणार्थाः।। यदुक्तं स्थानादग्नीषोमीमार्थाः इत्येतन्न ही
मः। यत्तु प्रकरणात्सवनीयार्था इत्येतत्तत्र ब्रूमः। यामहे कुतः। गुणार्थो पवसथ्ये हि सवनीयपुनःश्रुतिः। उत्पत्तिश्च क्रियावेषामाश्वि

नग्रहणोत्तरा।आश्विनंग्रहंगृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति।सवनीयानामुत्पत्तिः।श्व इति वैौपवसथ्ये
हनि स्थितः स्तुत्यां ब्रवीति।कः पुनर्गुण इति स्ववाक्यसंयोगाभावात्स्थिति।तद्दर्शयति।सर्वान्सवनीयाननुक्रम्य निंदा स्मूयते।यथा वैम
त्स्य इति।यथा वै किल मत्स्यो जले विवस्वन्ननवचारितगतिः प्रत्यक्षजनमुपैव वर्तते किमितोगतः किमभूदिति एवमेवैते।य
शवः क्रियंतामित्येवमप्रज्ञायमानाः कर्त्तृजनमवकल्पयंते तेन पशुकीर्तनं तावदेवमर्थं न विधानार्थमिति गम्यते।सा हि
निंदापरत्वप्रशंसाशेषत्वेन नीता तदेभिः पशुभिः सवनीयसमाख्यातैः कथं सवनानि पशुमंति कर्त्तव्यानीति।सोपि प्रतिपत्त्या रू
पविधेयं तरशेषत्वं प्रतिपद्यते वपमया प्रातःसवने चरंतीति।तस्मादेतद्गुणार्थं यत्पुनः श्रुतिर्न्नवषाप्रकरणे बुद्धिं करोतीति।किं
पुनस्तत्त्वप्राम्नानमिति।आश्विनग्रहणानंतर्यगुणार्थत्वात्तदपि नोत्पत्तिसमर्थमिति मन्यते।भाष्यकारेणाकेवलस्याग्नेय
स्य पश्वाम्नानं दर्शितं नेतरेषां।।तत्र केचिदाहुः प्रदर्शनार्थत्वादस्याग्नेयग्रहणमविवक्षितत्वात्सर्वार्थमिति मन्यमानैर्नीता।
वाक्यांतरगणपेवं रूपाणि द्रष्टव्यानीत्यपरे।सर्वथा तु केवलाग्नेयप्रदर्शनमेवोपयुज्यते।यद्यपि हि ऐंद्राग्नादीनामौपवसथ्ये
रव्या। वास्योत्पत्तिस्तथापि तेषाम निनीतोत्तरसंख्यार्थत्वान्नेव चोत्पत्तिमित्यवदाम्नातान्पशुचर्म्मान्गृहीतुमित्यग्नीषोमीयस्यानमेव बलीयस्त्वात्।
यशुतिसत्वेन ग्रहणसमर्थं तस्य प्रकरणाभावात्तु एवातस्मान्नसवनीयार्थ इति।।तेनोत्कर्षस्य कालविधिरिति चेत् इदानीं क

श्री०
२६

26

तराःसवनीयामुत्पत्तिवाक्यमित्येतत्परिज्ञानाविनाधिकरणसिद्धिः तत्रपूर्वपक्षवादीआहइतिचेत्सवनीयप्रकरणाम्नानंमन्यसेतदयु
क्तंकुतःसवनीयान्पुरोडाशानुपयाप्तुत्कृष्यवाक्यतःतत्राप्यनियमप्राप्तेतद्विशेषोविधीयते।वपयाप्रातस्सवनेप्रचरंतीतिअनेनैवव
चनेनोत्कृष्टेषुयानेप्यचानदेशत्वाद्गानामुपाकरणादिषूत्कृष्टेषुकालानियमेप्राप्तेसत्याश्विनग्रहणानंतर्यंविधीयते।
तेनतद्वचनाद्गुणार्थश्रवणमितरथाहिवाक्येनविधेयतपरिव्याणोपाकरणयोःकालविधानाद्व्यर्थस्वतःपुनश्चवयोगस्यावि
धेःनन्वाक्येनप्राप्तमेवपरिव्याणंतस्मिन्नेवकालेयोगविधीयमानेनानूद्यतांसत्प्रमतिरेकेणप्राप्तंनतुतदिदानींक्रियतांप्र
प्रसाचरणेनतत्कालाश्विनेत्यवमग्नीषोमीयकालकर्तादेवोपकारसिद्धिःएवंतर्हिसान्नाय्यपादेवप्राप्तंविद्यमानमनूद्यतां।
नचवाक्यतःतद्वदिदमुत्पत्त्यभिज्ञानान्।तत्रामान्यतःप्राप्तमनूद्यतेयत्ताद्रूप्येणप्राप्तंप्रत्यभिज्ञायते।नचपूर्वंयूपेकृतस्याश्वि
नग्रहणोत्तरकालंवर्तमानत्वेनानुवादोभवति।नहितदासौपरिव्ययति।नचपूर्वंकृतस्यपर्यग्निकृतादौशब्दवदीदृशेन
शब्देनानुवादःपूर्वोत्तरकालकर्माविविधद्वयपरिच्छिन्नत्वात्।एवंतर्हिस्मार्तवाक्यात्प्राप्तमनूद्यतां।स्मार्ताश्विनंग्रहंगृहीत्वोप
निष्क्रम्ययूपंपरिव्ययतीति।तदपिनास्तिप्रत्यभिज्ञानाभावादेव।यदेतत्प्राकृतंसवनीयंपरिव्याणमेतद्यत्रश्रुतंयच्चश्रवणात्प्रमाणायच
प्राकृतपरिव्याणनिर्वचनत्वाद्येनकेनविद्वासःप्रवृत्तिनाकरणेसतित्रिवृत्त्वानुवादोनप्राप्नोतीतितत्रानेकार्थविधानाद्वाक्यभेदः॥

राम
२६

ग

तदा चैवं प्राप्य ग्रंथः उत्तरग्रंथो हि परिस्थाणस्य किंचिद्विधीयते तत्संबंधित्वेनोपात्तं निरूढद्रव्यं कालो विधीयते नोपाकरणस्य वेसु उपाकरणकाले
द्रव्यदेवताविशिष्टं च कर्म विधीयते तत्पर्थः तस्मादस्य गुणार्थत्वादग्निपूर्वपशुसवनीयानां प्रकरणमिति। नैकदेशत्वान्नाय यदा हि पूर्वे पशुः
सांगानां सवनीयानामाम्नानं तदा तत्रैव सर्वमनुष्ठानं प्राप्तं वचनाद्वपाप्रचारादिमात्रमुत्कृष्यते नोपाकरणादीनि तदा द्विरुक्ति
संबंधादिति। यद्वपाहोमोत्तरकालपदार्थास्तत्संनिपातिनो वा तन्मात्रस्योत्कर्षो भवेन्न प्राग्भाविनामुपाकरणादीनां यानि च
प्रधानकालान्यंगानि तेषां प्रधानकालत्वं वक्ष्यते। पश्वंगानि त्वकचारित पूर्वपशुकालत्वान्न प्रधानकालं गच्छन्तीति। तस्मादुपाक
८ रणाद्युत्कर्षव्याख्यानेनेत[illegible]वचनोत्कर्षः कर्तव्यस्तत्र गुणफलवाक्यसंनिधाने कार्यविधानाद्वाक्यं भिद्यते उत्पत्तिवाक्येन वा मते
स्मादेतदुत्पत्त्यर्थमिति। तान्निवृत्य[illegible]प्रकरणे विधीयानेकार्थत्वं दर्शितं। एकमेव तु गुणार्थमेतस्मिन् वाक्यं भिद्यते तस्मिन् हि तदंश
वचस्त्विह पूर्वे पशुप्राप्तोपाकरणोत्कर्षमात्रविधानाद्वाक्यभेदः परिहृतः। तत्र केचिद्देवं समर्थयन्ते यथा विश्वाग्ने प्राप्तीग्नि
तिज्योतिष्टोमसंबंधः तद्विशेषश्च विधीयमानेनेकार्थत्वमुक्तमेवमिह वपाप्रचारेणानन्तरस्योपाकरणस्योत्कर्षश्च वाक्येन वा सः
तद्विशेषश्चेत्यनेकार्थत्वमिति। न त्विदमाग्नेयी वाक्यसदृशं तत्र हि संबंधविशेषपरं विधौ सामान्यसंबंधप्राप्तिमनूद्य तत्प्रमा
णकाम्यविरागमयी[illegible]ज्ञावादितर विषयसामान्यसंबंधे प्रत्यन्यथानुपपत्तिः ज्ञायते। अत एतद्वेदेनाननुपतन्ति विचिंकल्प

27

मतावाक्यभेदोभवति।न त्विहन्नाद्दक्त्वा तिपन्नो भिन्नयतः सामान्येनोत्कर्षप्राप्तिं दर्शात् विशेषपरस्यार्थापत्तिलोपः कल्प्यते।तत्रापि नेन्नदर्थापत्ति
वाचिनीप्रतिपन्नमूता सामान्यप्राप्तिर्नाभिविष्याद्भिषीमात्रप्रापणं निराकरिष्यते।प्राप्ते पि कर्म्मण्येकपदोपात्तेनैकार्थविधि शनाद्युदाह
रणे न्त्रतत्रप्रतिपादितः।तेन यद्यपि त्राश्विनंग्रहं गृह्णातीत्यनेनद्वयमपि प्रातःसवनमाश्विनग्रहान्तरकालत्वं विधीयते तथा
पि विधायकस्यैकपदानुसारात्तस्य तस्योपदिश्यते त्पतदापत्तिर्नास्ति किमुतानेक विधानेर्थादितरसिद्धेः।अत एव भाष्यकार
णानेकविधिदूषणेभिहितं।नत्वानेकार्थःपरस्परासंबंधेसति शक्यो विधातुमिति।ज्ञानातिद्यसोयथासंख्यातामर्थानामेक
स्मिन्विहितेन्येविनैवायासेन प्राप्नुवंति।तेन यद्येकस्मिन्विहिते यदर्थसहस्त्रमपर मापद्यते न काचिद्विरोधो विधेरायासोवा।
दृश्यते इत्याश्रीयते।तस्य त्वन्यथाप्युपपद्यमानत्वमेवैकोनिराकरणोपायः।न चेहाप्तिसपद्यायत्रैषविधिःश्रुतःप्रातःसवनसे
वेयांचप्रत्वाआश्विनग्रहणानंतर्यं विदध्यात्तस्माददोषः।तवैवत्वेषुदोषः।यस्यानेकद्रव्येष्वता विशिष्टकर्म्मविधानमपि
ज्योतिष्टोमस्तुत्याप्रातःसवनविशेषकालसंयोगोपरः कल्पनीयः।सर्वेषु चोत्कर्षापकर्षेषु सामान्यविशेषत्वेपानेकविधिदो
षोस्तीति।साधकं कर्म्मगुणविध्यसंभवात्कर्म्मान्तरविधित्वप्रसंगः।तद्यथा माहेंद्रस्य स्तोत्रं प्रत्यभिषिच्यत इत्यत्राभिषवनीयस्य माध्यंदि
नसवनमाहेंद्रस्तोत्रकालविधेरनेकार्थत्वमेवं तिष्ठतेपत्नीं प्रतिपयजंतीत्यादिष्वपि योजनीयं।।अपि चैकस्मिन्यदार्थेनुष्ठीयमाने

विधीयमाने चार्थांतरं हि चापद्यते। किं विध्यतनांतरसाध्यं किं वित्तदत्तु निष्पाद्यं। यथाग्नेर्विधौ ग्रहणादयः सिध्यत्तत्र पञ्चयत्नांतरसाध्यं
मवतस्मिन्नकृते विहितकरणं शक्यमित्यवचार्यते तत्रार्थापत्तिलभ्यं विधिशक्त्यंतरं कल्प्यते। यावद्यावती च शास्त्रीया सामग्री विवक्षिता। य
त्वनुनिष्पादिवदन्यपि पुरुषप्रयत्नसाध्यस्य व्यापारांतरमंतरेणैव सिध्यति न तेन कश्चिदायासो भवति। न चेहाश्विनग्रहणानंतर्ये
विधीयमाने नानुष्ठीयमाने वा श्रुत्या प्रातःसवनादि संबंधभेदेन व्यापरितव्यं। तेन नात्र कश्चिदुत्कर्षसामान्यं विद्यते श्रुतमात्रमाश्विन
ग्रहणानंतर्यमात्रे विहिते यदितदंतर्गतत्वात् श्रुत्या प्रातःसवनाऽहर्गणविशेषमुहूर्तनाडिकाक्षणलवनिमेषकालत्वं व्यस्त
त्वाद्यस्य प्रसज्यते किं क्रियतां। अपि च शिंशपामानयेत्यत्रापि वृक्षत्वद्रव्यत्वसत्तादयो ज्ञेयां न वाक्यभेदः स्यात्। अतः पूर्ववच्छ्रुतप्रातर्यो
पाकरणस्य कालांतरमात्रमाश्विनग्रहणानंतर्यं विधीयत इत्यदोषः। अन्ये तु द्वयोः परिव्याणोपाकरणयोरुत्कर्षो द्वाक्यभेदं
समर्थयंते। तदपि तु सुपरिहरं चोवलु परिव्याणोत्कर्षादेव तदादिवाभिसंबंधादित्येवमुपाकरणोत्कर्षसिद्धेः तत्रैतस्याग्रह
तिप्रमोचनमुत्कृष्यमाणस्त्वदाद्युत्कर्षकारीति नापूर्वं इति। तदप्युक्तं कृतदेशात्तु पूर्वं स्यादित्यत्राप्यधीतानामपि विदेवनादीनां।
मयकर्षवर्णनेन तथा पूर्वमित्यस्य विशिष्टविषयत्वव्याख्यानात्॥ अथवा सत्त्वा आश्विनं ग्रहमित्येतद्वाक्यशाप्यपरिव्याणोत्तरानुवा
दात्त्वा वाक्यभेद इति। अपयो व्येता विशेषितसाधनकत्वात्तत्र विहितत्वानुवादोन संभवतीति तदप्युक्तं। एवं हि सिद्धांतवादि पिपूर्व

श्री०
२८

28

पक्षवादिनाचोदितस्य च यं परिहारं वक्ष्यतीति सोऽस्यापि न विध्यतिति। ननु च तस्याऽपूर्वकर्मविधानादनेकार्थविधिविरूपपद्यते नास्येति। नैष वि
शेषो यत्र ह्येका क्रियाविशेषणमनेकमुपादीयते तत्र तद्द्वारेण तद्विधिस्तु लभ्यत इति विशिष्टविधानन्यायो यत्र पुनः स्वविशेषणविशिष्टा
क्रिया विधीयते वाक्यांतरप्राप्तस्य च क्रियांतरस्य विशेषणं तत्रावश्यं पावर्त्तनीयो विधिप्रत्ययो देवतादिविशिष्टो हि यागो वि
धीयमानः स्वविशेषणमेवादत्ते पुंसमर्थ्येन। विधीयमानपरिव्याणविशेषणं तेनाऽपूर्वकर्मविधिरुष्यत द्विवक्तव्यं कतर
त्तद्विशेषणं कतरदन्यविशेषणमिति। तस्माद यमुनयपं भात्मानैकस्य चोदयितव्यः। तत्रावश्यं सिद्धांतवादिना मये ऽप
रा रिव्याणयोः साधारणी ... नेति परिहारो वक्तव्यः वक्ष्यति हि दर्शनाच्च लिंगदर्शनादिति। यद्यदत्तस्य यूपस्य परिव्याणं तस्य त
स्येषा वाक्येन विज्ञायते तथा प्राप्तानुवादान्न वाक्यभेदः। अथवा यत्किंचिद्दृत्वा यूपं परिव्यायोपाकरोतीति पूर्वे घुःप्राप्तमुपाक
रणस्य परिव्याणानंतर्यमनूद्य ऋचिन ग्रहणानंतर्यं विधीयते वरं वाक्यभेदाद्व्यवहितकल्पनाश्रयणं। तस्मादेवं वर्णिते
अवश्यं ताक्तसवनीयानामेकेनोत्पत्तिरेकोनवगुणे विधातव्यः। तत्र पूर्वपक्षुः नस्य तावदेकस्यैवोत्पत्तिवाक्यत्वे हेतुरुक्तः।
न चेतरस्यापि नाशिः यद्यप्येवं तथापि विकल्पसमुच्चयासंभवात् केन चिद्विशेषेनान्यतरस्मिन्नाश्रयितव्ये विशेषो ...यते पुरस्ता
दितदवस्थितं यथा पादे योगुणस्ति रोहितकर्मानुवादनशक्यो विधातुं नानुपादयस हि कुंडपायिनामयने होमसंयोगबलात्कर्मा

राम
२८

तरत्वमापादयति । तदिह वपाप्रचारोत्पादयन्नुत्पत्तिकालस्य सवनीयानुवादेन शक्यो विधातुं किं पुनः प्रातःसवनमुत्पातदेशं सवनीयप्रत्य
भिज्ञाने सति । अथ तन्नपुनरामनेने निर्ज्ञातप्रयोजनत्वादाश्विनग्रहणेन तु सहांगांगिस्वं वाभावात्कालार्थसंयोगस्यानुपादेयत्वात्क
र्म्मोद्देशेन विध्यनुपपत्तेरवशेषं कालोद्देशेन कर्म्मविधेयं । अथ याप्याश्विनं प्रत्यंगत्वेन विधिस्तथाप्यंगेनानुपादेयत्वा [illegible]
देषैव वचनव्यक्तिः । एतस्य गुणविध्यनुपपत्तेरवशेषं प्रकरणांतं न्यायेनोत्पत्तिविधेरन्येनानंतरेणप्रतिबंधादुत्पन्नावधावध्यमाण
याकर्म्मान्तरस्यात् । तेनास्य तावत्कालापेक्षयोत्पादकत्वं सिद्धं । अतस्येतरस्य परिशेषसिद्धं गुणविधित्वं । न हि तस्य किंचि
द्दकारणं । अत एव वपाप्रचारेणोत्कर्षोऽस्ति नास्तीति विचारितं । सति हि वपाप्रचारेणोत्कर्षे पूर्वस्यैव प्रातःसवने विपरिवृत्तेः
कालं प्रत्युपादानं प्रत्यभिज्ञानात्कल्प्येत । यथोक्तं सन्निधौ त्वविभागादिति । कालेन च कर्म्मणि विधीयमाने प्रत्ययस्य सन्निक
र्षे व्यापारो भविष्यति । वपाप्रचारकालस्य पुनः सवनीयोत्पत्ति क्रियातः क्रियोत्तरविशेषणत्वाद्दुःप्रतिपादो विधिरिष्टो विधेरि
ति वाक्यभेदः स्यात् । अस्मत्पक्षे पुनर्यथैकवाक्यत्वं भविष्यति तथोक्तं । एवं च परिव्याणस्यापि प्रकरणान्यां गमाक
कालानुवदिष्यते । अन्यथा पुनर्विप्रकृष्टतरेणाक्रमेण प्राप्तिर्भयेच्छानाद्यंततस्माद्यमेवोत्पत्तिविधिः । कथं पुनरभिन्यत्वे भाष्य
कारस्य वाक्यभेदोपन्यासः उच्यते । कर्म्मणि भेद एवायं वाक्यभेदो निर्वीयते । संबंधे [illegible] एकवाक्यत्वमर्थान्यत्वे पि गम्यते । वाक्यभि

घेतनतेनैकवाक्यतामियान्यथाकर्तृगुणेतुकर्मसमवायाद्वाक्यभेदः स्यादित्यत्रासत्यपि लक्षणे तो वाक्यभेदे परस्परासंबंधाभिप्राये
ण कंसाकांक्षत्वेकवाक्यमित्यत्र तु संबंधमात्राभिप्रायं तथेह त्वपत्यर्थत्वे सति तदेकवाक्यतायातिन गुणार्थ इत्युच्यते। अर्थैतिचेन्न। न
श्रुतिविप्रतिषेधात्॥ स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात्॥ एवं सवनीय प्रकरणं निराकृत्य पूर्वविनैव हेतुना सिद्धांतं
निगमयति। यद्यप्यवांतरप्रकरणे नाबाध्यमानं स्थानबाधेनैव महाप्रकरणं सर्वार्थत्वप्रतिपादनमावश्यकं तत्र निवृत्त्यर्थं पुरो
डाशः यद्यपि प्रकरणं स्थानात् बलवत्तथापि पशुयाजानुमंत्रणान्वायनलिंगात्तु गृहीतः क्रम एवात्र बलीयान्विज्ञायते। योग्नेतया
हि पशुधर्माः पशुयागमपेक्षंते न सोमयागं न वा नपेक्षिताः प्रकरणेन गृहीतुं शक्यंते तदंगावतरणेन चात्र विप्रकृष्टतरत्व
त्वर्थेन च षष्ठीप्रतिपाद्यात्संबंधाद्विना नर्थक्यं तदंगं न्यायेन्नीत्युक्तं। ननु चाविहितधर्मांतरस्साकांक्षत्वादग्नीषोमीयपद
प्र र्थांतरादिहानीयमानः संनिहितान् धर्मान् प्रकरणेनैव गृह्णातीति न चैतत्संभव्यं स्थानाद्वैति नैषदोषोयत्रहि प्राकृतैरंगैः पूर्य
माणार्थो विकृतौ तन्मध्ये पूर्वमिणिकानि विद्यते तत्र विकृतौ प्रकरणग्रहणं भवति। अत्र पदेशात्तु उत्पन्नोग्नीषोमी
यः प्राकृतैः सावन्निष्पत्तिदेहैः सोपकारैस्सनिराकांक्षीकृतः ततः हानितस्मन्न तत्प्रयोजनाद्धर्मान्साकांक्षत्वाद्यदपत्तनुमित
वा थं निवः संबध्यते। स्थानस्यैवेतदेवलक्षणं यदुत धर्माणां साकांक्षत्वेन प्रधानस्योपाध्यकार्थेनावंसंबंधः स्थानस्यास्तुं कांक्षा।

29

पिधानार्थेनास्यचोदनाविधिवैलिंगदानांहेतुवन्निगदानांवैवंजातीयानामर्थवादानांनोक्त्यान्नीहि छिद्रा ५

५२

नास्तिविति। लिंगदर्शनाद्यासर्वेषांद्व्याववसमीनविधानत्वेसवनियपक्षुपुरोडाशदर्शनंनोपपद्यतेपुरोडाशपागस्यहिदेवतासंस्कारार्थत्वंवक्ष्य
तिसवलिंगादग्निषोमावेवसंस्कृत्तुशक्रोतिनाग्निंवसमानविधानत्वेनाह। विद्वांतवत्संवीततस्मात्पुरोडाशदर्शनादातिदर्शिकासवनीय
स्यधर्मा इति। अचोदनागुणार्थेनासत्यंदेवतासंस्कारार्थःसन्नपाप्रीतिनत्वपंकेवलस्तदर्थःकिंतहिंसुषिरावाप्तःतर्हिपशुरि
तुपक्रस्यच्छिद्रापिधानार्थोप्यतस्यविनापिदेवतांसवनीयस्यच्छिद्रंपिधातुंपुरोडाशःकरिष्यतेतेनसमानविधानत्वेप्यदोषइ
तुक्तेसूत्रेणोत्तरमाहनच्छिद्रापिधानंक्रतुनापेक्षितंनापिपुरोडाशपागेष्टातद्दृश्यतेतस्मात्तत्रतत्प्रयोजनमितियथोक्तमेवलिं
गदर्शनंसिद्धं। ७। दाहयोःकालभेदादसंयुक्तंश्रुतंस्यात्। एवंक्रमस्याविरोधंदर्शयित्वाइदानींविरोधंदर्शयितिशाखाहरणा
दीनांमेपवसथ्येदेशसामान्यादवांतरप्रकरणाद्वादव्यर्थत्वंप्राप्नोति। प्रकरणविभागाद्वातत्संयुक्तस्यकालशास्त्रं। सद्योनेष
घ मेदेशेक्रियमाणंनामंप्रतिपद्यतेपौर्णमासंवत्सवांतरप्रकरणंदधियागस्तंभावास्यायांपव्यतेक्रियतेवातस्मात्तुल्यंपयसा।
दधित्वसिद्ध्यर्थास्तुकेचित्तस्यधर्माःपूर्वेद्युःक्रियंतेनृवतेशाखाहरणादीनांग्राहकान्गुणानांवपरार्थत्वादसंबंधइति
स्थितत्वात्। तस्मादुभयसंयुक्तस्यशाखाहरणादर्वनात्पूर्वेद्युःकारणंनदव्यर्थत्वादित्पदोषश्चाचातद्वत्सकांतरप्रकाम्नानं। अ
हर्धर्माणांप्रातःसवनस्यसमानदेशेसमाम्नानमनुष्ठानंचेत्यनेनातुल्याशंकायांतुल्पत्वमापाद्यतेप्रकरणंतावत्सवनत्रयोपेतस्य

श्री०
३०

ज्योतिष्टोमस्य समानं । न च प्रातःसवनस्य निष्फलस्यावांतरप्रकरणं । न च प्रकरणविरोधि स्तोत्रेणैव विनियोजकं भवति । तस्मात्सवनांतरग्र
हाणामपि धर्माः स्युरिति । एतेनाग्नीषोमीयादिपुरोडाशधर्माः साधारणपशुषूक्तं ॥ ९ ॥ रशना च लिंगदर्शनात् ॥ अग्नीषोमीये यूपपरिव्याण
मात्राय पुनस्सवनीये सन्नाश्विनयहंस्थीत्वेत्याम्नातं । तच्च निर्गुणपुनश्श्रवणात्कर्मांतरमुत्पन्नयोश्चकेन विद्रूपेण न वितव्यं
यच्च परिव्याणद्रव्यं सा रशना लोके वेदे च प्रसिद्धा तेनोभयत्र तादर्थ्यादिव रशना सा च किंमयी किंधर्मा चेत्यपे[illegible]षोमी क्षि
षोमीयपशुस्ताकेनानुमितप्रकरणेन त्रिवृद्दर्भमयी प्रविष्टानां कार्यत्वेनाम्नानाद्विशेषरूपतीयते । न सवनीयपरिव्याणेषु । तस्मा
३ दितरेषां [illegible] धर्मवद्दर्भरशनेतिकर्त्तव्यताग्नीषोमीयार्थैवेति । तथा प्रामे लिंगदर्शनात्साधारणीत्याह । न हि सवनीयोत्पत्तिवा
क्ये त्रिवृत्त्वानुवादो रशनाधर्माः साधारणपरिघ्नोपपद्यते । का प्राप्तिरिति चेत्तामाह । वाक्यसंयोगाद्रशनामात्रस्यास्थानाद
ग्नीषोमीयस्य वाक्यं तस्माद्यत्नवत्तरमिति । ननु न तद्वाक्यं हितदर्थत्वादित्युत्तरं वक्ष्यतीति तेनाग्नीषोमीयापूर्वप्रयुक्तत्वाद्यव
स्थास्यादिति । नैतदेवं न ह्येषा साक्षात्पशुसंबंधिनी । किंतर्हि यूपांगं वा तत्संस्कारादिति वक्ष्यतीति तेनेह श्रमेकवाक्यत्वमेत
न यूपपरिव्याणसाधारणसाधनत्वेतद्धर्मा इति यथा चाग्नीषोमीयस्यैतन्न यूपपरिव्याणमेवं च यूपैकत्वात्सवनीयस्यापि यूपपरिव्या
णं द्वयमपि चापूर्वसाधनमिह प्रतीयते । ननु दर्शपूर्णमासबर्हिरिव पिंडपितृयज्ञे भविष्यतीति । तस्माद्बर्हिर्द्धर्मवैषम्यात्साधारणा रश

राम
३०

नाधर्म्मीः ॥१०॥ स्पारादिष्टमसंयुक्तमितरैरसन्निधानात् ॥ प्रसंगाद्वाक्यप्रकरणविरोधाविरोधौ विचार्य्यते तत्र स्थानं वा विक्वा प्रकरणेन
सर्वप्राकरणिकग्रहार्थायेह धर्म्मा इति प्रतीतेरनारभ्याधीतार्थत्वमशक्यं प्रत्येतुं तेनासंयुक्तमित्याह ॥ संयुक्तं वा तदर्थत्वाच्छेषयतीति
भितत्वात् ॥ प्रकरणस्य विशेषकत्वान्नज्योतिष्टोमापूर्वसाधनत्वे वैतेइत्येवं पुराग्रहादिष्वनिवर्तमानाः प्रकरणेव्यवति
ष्ठंते ॥ येषां तु प्रकरणाधीतानामपि तदक्षिते पूर्वेणैव न्यायेन वाक्यसंयोगाद्धर्म्मत्वं तोमविधातुमर्हंतीति ॥ अथदाभ्यादीनामपि
धर्म्मत्वा ॥ निर्देशाद्व्यवतिष्ठेत ॥ मैत्रावरुणादिश्रयणीदीनां प्राकरणिकसर्वार्थत्ववाधेन वाक्याद्व्यवस्था ॥ अत्र तु प्राकरणि
कव्यवस्थावाधेन वाक्यात्सर्वार्थत्वमित्यपहृष्टांतः ॥११॥ अथ्यागमप्रकरणेतद्वत् ॥१२॥ नैमित्तिकमतुल्यत्वादसमानविधा
नं स्यात् ॥ अविकारेण हि येन कार्य्यप्रयुक्तत्वाद्धर्म्माणां साधारणमुक्तं फलचमसे पिबे विकारत्वात्सोमकार्य्यवर्तितै । स्प ।
तस्मात्तस्यापि सोमधर्म्मविधिः साधारणाय यथाव्रीहीन्यावृत्तीत्येवमादिर्यवानामिति प्राप्ते मिथीयते ॥ युक्तं यद्व्रीहिव
र्म्मा यवेषु क्रियंते द्वयोरपि वैकल्पिकत्वेनानित्ययोस्तुल्यरूपत्वात्सोमधर्म्मास्तु नः नित्यवज्ज्योतिष्टोमापूर्वेणा गृहीता
स्तेनित्यमेव द्वारमाश्रयितुमर्हंति ॥ सोमस्य नित्यत्वान्न फलचमसस्त्राह्मणपदेविधानाभावात् ॥ यदि सर्वेसोमायमर्हेन फलचमसो
भवेत्ततो राजन्यवैश्ययज्ञयोरभावात्सोमोप्यनित्य इति तुल्यता स्यात् ॥ सत्तु यजमानचमसमात्रात्निराकृते पि ग्रहचमसांतरेषु सं

श्री०
३१

भवाद्विरुत्पत्तेनधर्म्मास्तन्नव्यभिचरंतीतितत्संयुक्ता॥फलचमसस्येदानींकथंभवीष्यंतीतिकार्य्यापत्त्येतिक्रमआह॥किंकार्य्यापत्तिरुपदेशा
तिदेशाभ्यामन्या॥एतयोरेवांतर्गतावा॥अतिरिक्तेतिकेचिन्मन्यंते॥नतुतथासतिप्रमाणत्वाव्यवसानमतोतिदेशांतर्गतिरेववक्तव्या॥कथं
पुनःप्रकृतावेवातिदेशःस्वाल्पतःशक्तित्वात्सत्यंनावकल्पतेयत्रकर्म्माधर्म्मातिदेशोभवति॥नह्येकस्यकर्म्मणःस्वितएवप्रकृ
तिविकारभावउपपद्यते॥द्रव्यधर्म्मातिदेशस्त्वयंसमानेपिचकर्म्मणिद्रव्यभेदःप्रत्यक्षः॥यथाचकर्म्मसाकांक्षंकर्मांतरा
द्धर्म्मान्गृह्णातितथाद्रव्यमपि॥तस्मात्फलचमसेनेज्याभावयत्वाद्धर्ममनंतरविपरिवृत्तेर्द्रव्यसारूप्यात्सोमवदित्यवगतेरति
देशसिद्धिः॥किंभवतिप्रयोजनंयदानयोरपिपक्षयोःसोमधर्म्माःप्राप्यंतेसत्यंप्रभुमयत्रकारणंयथैवान्यत्रौपदेशिकातिदे
शिकयोःगुणकामप्रवृत्त्यप्रवृत्तीप्रयोजनंभवतःतथेहापिद्रष्टव्यं॥निवृत्तिर्वाद्रव्यभेदादित्यपिहिशक्यंवक्तुंयहिसामभ्या
भिषवमानादिष्वाश्रिताःफलसाधनत्वेनावगताःतेकथंफलचमसस्थःसाधयिष्यंति॥नतुसाधनत्वेनफलचमसः
प्रवर्त्तमानायएवतदंगपातिनःक्रत्वर्थेनक्रियंतेतानेवशक्नोतिगृहीतुंनफलार्थानतःसिद्धांतेनिवृत्तिरनेनैवाहापिक
र्त्तव्यइत्युक्तंभवति॥समानेपिहिकर्म्मप्रकारेद्रव्यसामान्यविद्याभावात्कार्य्यापत्तिपुरःसरंप्राप्नुवत्सोमपदस्याशक्तेर्विक्रियावि
ज्ञायते॥१४॥प्रतिनिधिश्चतद्वत्॥प्रतिनिधावप्ययमेवन्यायःप्राप्नोति॥नतद्वत्प्रयोजनैकत्वात्॥यदिनीवाराःस्वेनैवमहिम्नाकर्म्म

राम
३१

31

साधनं भवेयुस्ततः कार्यापत्त्या च धर्मैः संबंधे स्यान्न तु तेषां साधनत्वे किंचित्प्रमाणमस्ति येहित्वा वद्री हि धर्माः कतिपयाः दृश्यन्ते तदुपादित्स
या पुरुषः प्रवर्त्तमानो नांतरीयकत्वान्नीवारत्वमुपादत्ते न कर्मांगतया व्रीहि च धर्माः पुनर्व्रीहिशब्देन प्रत्यक्षेणैव चोदिता इति समानवि
धानाः न हि नीवारेभ्यो व्रीहिबुद्धिर्व्यावर्त्तत इति वक्ष्यति। सामान्यं तच्चिकीर्षा हीति तेनाहतह्वदेवासौ प्रवर्त्तत इति॥ अशास्त्रल
क्षणत्वाच्च। असौ शब्देनोदितश्च प्रतिनिधिरर्थात्क्रियते तस्मादपि निःप्रमाणकमस्य कार्यापन्नत्वमिति केचित् न तु प्रतिनि
धिरशास्त्रलक्षणः प्रधानसमाप्तिचोदितत्वात्। यदि वा शास्त्रलक्षणः स्यात्तेन क्रियेत न च तदकरणात्कश्चिद्दोषः स्यात्। अत
एव वर्णितव्यं सूत्रमशास्त्रलक्षणत्वान्नीवारत्वस्य कार्यापत्तिर्नास्ति ये तु व्रीहिधर्माः प्रधानचोदनया सकलधर्मासंभ
वाच्च व्रीहिचोदनया विफलाश्रितास्तेऽर्थांतरत्वाभावान्न कार्यापन्नाः॥ १४॥ नियमार्था गुणश्रुतिः। यद्यशास्त्रलक्षणत्वा
न्नीवाराणां कार्यापत्तिर्नास्ति पूतीकानां तर्हि शास्त्रलक्षणत्वादनित्यत्वाच्च फलचमसवत्कार्यापत्तिप्रसंग इति शंकेऽभिधीयते।
यागसाधनं तां कुर्यात्पूतीकानां यदि श्रुतिः ततः स्यात्कार्यवर्तित्वं न त्वेवं सा प्रवर्त्तते। सोमनाशे हि प्रतिनिध्यपेक्षायां सत्यां पू
तीका विधीयंते न यागसाधनापेक्षायां अतो ये प्रति विधिनियम एवं भवति यत्सकलसोमधर्मासंभवे विकल्पः सोमधर्मानुत्पादयेत्त
त्पूतीकागतानिति वक्ष्यति हि नियमार्थश्चाविद्धिविधिः तन्त्रित्वं तच्चिकीर्षा हीति च। अतश्च नैवात्र पूतीकात्वं कर्मांगं किं तर्हि सोमत्व

श्री
३२

र्म्मोपलक्षणार्थं तेन श्रुतिलक्षणस्यापि पूर्वेण विशिष्टत्वमिति । तेनेहापि तदेव विंतायाः प्रयोजनं अतश्चातदा अयमथ्यतदुपलक्षणपायाद्गुणका
मे प्रवर्त्तितव्यं अन्ये त्वाहुः सकलवचनस्याश्रयिणो हि गुणकामा वैकल्पादिह न प्रवर्त्तन्ते नित्यस्य हि कर्म्मणो ऽवश्यं प्रक्रमात्प्रक्रान्तस्य
च सर्वस्यावश्यसमापनीयत्वात् किं चिद्धर्म्मं वैकल्पेष्वेव गुणानामतुज्ञायुज्यते यथा तु काम्यानि प्रति निचिनि प्रक्रमो ना
स्ति तथा गुणकामेष्वप्रवर्त्तितव्यं । यदि तु प्रक्रान्ते कस्मिंश्चिद्गुणकामकल्पेद्वचना [illegible] सति प्रतिनिचीयते तत तस्याप्यवश्य
पि समापनीयत्वात् क्रिकारणप्रतिनि [illegible] नावात्तन्येसमापनमित्युहानूह्यविचारप्रयोजनं ॥ १५ ॥ संस्थास्तु समानविधानः प्रक
32 रणविशेषात् अनेकयज्ञहवमसयागा मासात्मकास्तातु संस्था ज्योतिष्टोमो न वा रितः सर्वसंस्थासु ज्योतिष्टोमरूपम
नुस्यूतं यथैव देवदत्तस्य स्थानोपदेशनगमनशयनाद्यवस्थाभेदे ऽपि देवदत्तत्वं नापैति तथा ज्योतिष्टोमात्मनः संस्थात
रोपजननापायेतत्वं नापैति । संस्थानां च विरोधादन्योन्यं समावेशो नास्ति ज्योतिष्टोमरूपं तु सर्वत्राविरुद्धमनुवर्त्तते । अपि च
ज्योतिष्टोमः फलाय चोदितः ज्योतिष्टोमेन स्वर्गकामो यजेतेति तथोक्थ्यादिसंस्था नामपि पशुकामउक्थ्यं गृह्णीयादि
त्यादि फलविधानं तमेवं विधं ज्योतिष्टोमं प्रकृत्य दीक्षणीयादयो धर्म्माः समाम्नाताः स सन्दिह्यते किं सर्वसंस्थज्योतिष्टोमोद्देशेनाम्ना
ता उत केवलाग्निष्टोमसंस्थोद्देशेनेति । न त्वयमुपन्यासो युक्तः न हि धर्म्मसंबन्धवेलायामुद्दिश्यमानस्य ज्योतिष्टोमस्य कावित्स

स्था विशेषणत्वेन श्रूयते। यद्यपि कार्थंचिद्भूयतत्तथाप्युद्दिश्यमानविशेषणत्वान्न विवक्ष्यते। न चोक्थ्यादिग्रहणांशेन ज्योतिष्टोमस्य ग्राहकत्वं
फलसाधनभावाद्दितत्रोक्थ्यादिष्वप्येवेति वार्त्तं यतावतोभवंति ज्योतिष्टोमस्तत्राश्रयत्वेनोपसर्जनभावान्न धर्म्मग्रहणयोग्यो विज्ञायते।
ज्योतिष्टोमेन स्वर्गकामः इति चैतद्वाक्यगतस्य ज्योतिष्टोमस्य धर्म्मसंबंधः सर्वसंस्थास्वविशिष्ट इत्यग्निष्टोमसंस्थमेवेत्युक्तः
अत एवं वक्तव्ये। किं ज्योतिष्टोमस्यैवै तद्धर्म्माम्नानमुतोक्थ्यादीनामपि संस्थानमिति। तत्र एवं समर्थ यमेतदेव ग्रंथेनोक्त
मिति। यद्यपि संस्थानि द्धर्म्माष्टंत्येते तथापि तासां स्वयमक्रियात्मकत्वात् ज्योतिष्टोमस्वाश्रयत्वाद्द्वारभवतीति किं सर्व्वसं
स्थप्रख्यात्यमाह। किं द्वारभूतं फलवंतं च प्रख्यात्योत फलवंतमेवेत्यर्थः यदा च केवलज्योतिष्टोमार्थत्वं तदा तदसाधारणत्वा
त्परिशेषाद्वाग्निष्टोमसंस्थस्येव ज्ञायत इति तत्संस्थस्य व्यपदेशः उक्थ्यादिषु हि यद्यपि ज्योतिष्टोमस्यापि ग्राहकत्वमस्ति त
थापि तन्न व्यज्यते किं मुख्यादिगृहीता च धर्म्मा एतस्य द्वारत्वाद्भवंतु तात्मीयफलसाधनत्वादिति। अग्निष्टोमसंस्थावाच्यनिज
मंगमत्वात्संस्थेरपूर्णनयं ष्टकातीति शक्यते वक्तुं। तस्मात्सम्यगुपपत्तं धर्म्मसाध्वरूपं व्यपदेशातिदेशाभ्यां उपपन्नद्वयमसु
पगम्यत एवेति विधानग्रहणं किं प्राप्तं ज्योतिष्टोमेन सहसमानसंस्थानां च धर्म्मविचारं। कुतः। प्रकरणविशेषात् ज्योतिष्टोमो हि फल
वत्वाद्युपजातकांक्षो भावमस्तदनुवृत्तिसंनिधौ समाम्नातान् धर्म्माननुगृह्णाति न ज्योतिष्टोमत्वेन तत्त्वाद्वोक्थ्यादीनामेतेष्वेव धर्म्मेषु सर्वम

विशिष्टमुपदेशासंज्ञकत्वातिदेशो भवति तस्मादुपदेश एव साचारण इति ॥ व्यपदेशश्च तुल्यवत् ॥ आज्यशेषस्य प्रतिपत्तिं विदधत्तुल्य
वत्संस्कारान्तरप्रकरणसंबंधित्वेन कीर्त्तयति यद्यग्निष्टोमो जुहोति यद्युक्थ्यस्तेनैव शेषेण परिधिमनक्ति । यद्यतिरात्रस्तदेव होममयज्ञायुर्य
मश्रेष्ठस्तमत्यीमिति जपन्नहविर्द्धानं प्रतिपद्यतेति । अतो विज्ञायते सर्वेष्वः विधिरिह साचारण इति । सामान्यतो दृष्टमिवायुक्
युक्तं यदि हि वाक्यवशेन किं विप्रकरणाम्नातं संस्थाग्निसंबध्यते ततः किमसंयुक्तसंबंधेन । अपि युक्तं भवितुं । न हि वाक्यशा
हीनस्येत्याहविमुशेषकर्म्माणामप्यहीनार्थत्वमाशंकितं । यावद्वचनं न त्यपित्वा वचनानामित्येवं व्याचष्टे यदि हि सामान्यवि
हितमग्निष्टोमसंस्कार्थेव व्याख्याविना । अपि तदुपादानेन न तदंगत्वसिद्धिर्नात्रा ग्निष्टोमं संकीर्तयेद्यतस्तु संकीर्तयति अतो मन्याम
हे न्यूनमविशेषितमग्निष्टोमस्य न लभ्यते । तत्वैवं न लभ्यते यदि संस्थानामपि साचारणं प्रकरणं । केवलज्योतिष्टोमप्रक
रणपक्षे तु पुनः श्रुतिरनर्थिका स्यात् तथोक्थ्यादीनामपि यदि प्रकरणमक्षिततोन्यतरेणोद्धारणार्थं यदि शब्दप्रबंध
ग्रहणं युक्तमप्रकृतत्वेत द्वादशाहहीनस्येति वचनेनैव यदि शब्देन संबंधः स्यात् । न हि ज्योतिष्टोमप्रकरणे स्थितस्यैव
वादो युज्यते । यदि ज्योतिष्टोमस्तत एतद्यदि द्वादशाहस्ततोमुकमिति । अनेकसन्निहितापेक्षत्वे तद्वचनं भवत्यतोपि समानं प्रक
रणं । इदमपरं लिंगं ॥ आग्नेयमजमग्निष्टोम आलभेतैंद्राग्नमुक्थ्ये द्वितीयमैन्द्रं वृष्णिं षोडशिनि तृतीयमिति । समानविधानेव

पूर्वपूर्वोष्युत्तरोत्तरस्य प्रत्यक्षश्रुतत्वात्क्रियत इति द्वितीयतृतीयदर्शनमुपपद्यते। विकारपक्षेतु प्रत्यक्षश्रुतैरैन्द्राग्नादिभिराग्नेयवाचित
सर्वत्रैकस्यैवाध्याहारानुवृत्तप्रत्यक्षश्रुतत्वेऽपि संस्कारान्तरे संस्कारान्तरासंभवात्त्रिनिमित्तः पूर्वपूर्वनिप्राप्तो नियोगोऽग्निष्टोमस्तोत्रसमाप्यते सो
ऽग्निष्टोमेन तद्व्यमात्रं यच्चोक्थ्यादिषु समाप्यते नासौ पूर्वत्र समासेन भवति। तेन द्वितीयदर्शनादयस्संगृहः पक्षद्वयेऽपि तुल्यः
सत्यसंख्या निमित्तत्वे तुल्यस्तोत्रनिमित्तत्वे तु लक्षणच्छयन्त यथा वा भाष्यकारेणाह द्वे हि तत्र निमित्ते अग्निष्टोमस्तोत्रं छन्द
यज्ञात्रं वेति सिद्धवदेतद्ब्रवीति। कथं पुनः संख्यायाज्ञेत्र साधारणाग्निष्टोमादिसमभिव्याहारे तुल्ययज्ञोत्रनिमित्तत्वमव।
गी क्रियते न संख्यानिमित्तत्वात्। तासां हि फलवत्त्वेन प्रयोजनवत्त्वात्स्तोत्रशेषेणैव निमित्तत्वमापद्यते। तत्र केचिदाहुः सत्य
पि शब्दसाधारण्ये शास्त्रस्य महाविषयत्वानुग्रहार्थं स्तोत्रनिमित्ताश्रयणमित्यथवा स्तोत्रविशेषिताया एव संख्या
याः स्ववंशशब्दकत्वात्पूर्वतरप्रतीतविशेषणनिमित्तत्वसंभवे जघन्यविशेष्यनिमित्तत्वकल्पनानयुक्ता॥ यद्वाप्यवि
करणन्यायेनैव स्तोत्रेषु मुख्यश्शब्दः संख्यायां लाक्षणिकः श्रुतसंभवे च लक्षणाश्रयितव्याशङ्कोति वस्तोत्रमपि सप्त
मी निर्देशान्निमित्तत्वं प्रतिपन्नः निष्फलानामपि च भेदनादीनां वचनसामर्थ्यान्निमित्तत्वमिष्टमथवा संदिग्धेषु वाक्यशेषा
दित्येवं स्तोत्राश्रयणं सत्यपि वा संख्यानां मुख्यत्वे व्यवचारण कल्पनया वाक्यशेषेण स्तोत्रपरिग्रहः स्वे हि द्रुपते। अग्निमयम

श्री०
३४

34

ग्रमग्निष्टोममालभेत आग्नेयो ह्यग्निष्टोम इति। कतरस्मिन्नग्निष्टोमे य आग्नेयः स्तोत्रस्य वत्श्रुतिभागग्निर्देवता विधीयते न संस्थायाः सा
हि व्यापारपरित्यागात्मकत्वादभावभूतान्तत्वाभावस्य देवतया कार्यमस्ति। यागाभ्यासेपि हि या देवता सा तस्यैवाग्नेयत्वं करोति न सं
स्थायाः न च स एव संस्था। तदुत्तरकालोदासीनत्ववचनत्वात् संपूर्वस्य तिष्ठतेः न चान्यगतया देवतयान्यस्य व्यपदेशो भवति।
